दिनाङ्क :-11.01.2025

प्रातः - 06:55

प्रधानमन्त्री-युवसंवादकार्यक्रमः

प्रधानमन्त्री नरेन्द्रमोदी श्वः नवदिल्ल्याः भारतमण्डपमस्थले राष्ट्रिय-युव-दिवसस्यावसरे पञ्चविंशत्यधिकद्विसहस्रतमे विकसितभारत-युव-नेतृ-संवाद-कार्यक्रमे सहभागं करिष्यति। एषः संवादकार्यक्रमः यूनाम् आदर्शस्य भारतस्य आध्यात्मिकनेतृषु अन्यतमस्य स्वामिविवेकानन्दस्य जयन्त्युपलक्ष्ये भवति। संवादावधौ श्रीमोदी देशस्य त्रिसहस्रं यावत् युवनेतृभिः समं संवादं समाचरिष्यति। प्रधानमन्त्री दशसु विषयेषु प्रतिभागिभिः लिखितानां सर्वश्रेष्ठानां निबन्धानां संकलनमपि विमोचयिष्यति। प्रधानमन्त्री तदनु युवनेतृभिः साकं मध्याह्नभोजने सम्मिलितो भविष्यति यत्र असौ युवनेतृणाम् अनुभवान् विचारान् आकांक्षाः च श्रोष्यति।

प्रधानमन्त्री

प्रधानमन्त्री श्रीमोदी उक्तवान् यत् असौ द्विसहस्रसप्तचत्वारिंशत्ख्रीस्ताब्दं यावत् विकसितं भारतं निर्मातुं याः समस्याः सन्ति तासां समाधानानि वाञ्छति। असौ सबलं प्रतिपादितवान् यत् सर्वकारीययोजनानां शत-प्रतिशतं जनप्रापणं भवेत्। अयमेव वास्तविकः सामाजिकन्यायः धर्मनिरपेक्षता च वर्तेते। भारतस्य अग्रिमोद्यमिना निखिलकामथेन समम् एकस्मिन् साक्षात्कारे प्रधानमन्त्रिणा उक्तं यत् मनुष्यत्वेन तस्माद् अपि च्युतयः सम्भवाः परन्तु ताः कदापि दुर्भावयुक्ताः न भवितुं शक्नुवन्ति।

राष्ट्रपतिः

राष्ट्रपतिपदासीना द्रौपदीमुर्मुः अवोचत् यत् भारतीयप्रवासिनः जनाः सर्वेषु क्षेत्रेषु यथा औषध-प्रविधि-प्रभृतिषु उत्तमं प्रदर्शनं कुर्वन्तः सन्ति। राष्ट्रपतिः अष्टादशमस्य प्रवासिभारतीयदिवस-सम्मेलनस्य समापनसमारोहे भाषमाणा आसीत्। अयं कार्यक्रमः भुवनेश्वरस्य जनतामैदान इत्यस्मिन् स्थाने समायोजितः। अस्मिन्नवसरे राष्ट्रपतिः सप्तविंशति-सङ्ख्यकेभ्यः भारतीय-प्रवासिभ्यः विविधक्षेत्रेषु उत्कृष्टतायै प्रवासि-भारतीय-सम्मानं प्रदत्तवती।

अत्रावसरे राष्ट्रपतिः प्रावोचत् यत् प्रवासिभारतीयाः देशस्य अभिज्ञानं वर्तन्ते। अपि च विदेशेषु निवसन्तः भारतीयाः न केवलं भारतदेशे अर्जितानि ज्ञानानि कौशलान् च वहन्ति अपितु ते सहस्रवर्षाणि यावत् भारतीयसंस्कृतेः आधारगतमूल्यानि लोकाचारान् च प्रदर्शयन्तीति।

अमितशाहः

केन्द्रीयगृहमन्त्री अमितशाहः अद्य नवदिल्ल्यां मादकपदार्थानां व्यवसायस्य राष्ट्रियसुरक्षायाश्च विषये क्षेत्रीय-सम्मेलनस्य अध्यक्षतां करिष्यति। स्वापक-नियन्त्रण-विभागद्वारा आयोक्ष्यमाणस्य अस्य सम्मेलनस्य उद्देश्यं मादकपदार्थानाम् अवैधरीत्या प्रचल्यमाणस्य व्यापारस्य वर्धमानायाः चिन्तायाः तथा च राष्ट्रिय-सुरक्षायाः उपरि तस्य प्रभावस्य निराकरणमिति वर्तते।

## उत्तरप्रदेशः-कुम्भवाणी

उत्तरप्रदेशस्य मुख्यमन्त्री श्री योगि-आदित्यनाथः ऐषमो महाकुम्भाय समर्पितायाः आकाशवाण्याः कुम्भवाणीवाहिन्याः शुभारम्भं विहितवान्। अस्मिन्नवसरे भाषमाणः मुख्यमन्त्री विश्वासं प्रकटितवान् यत् कुम्भवाणी न केवलं लोकप्रियतायाः नवीनतां शीर्षतां प्राप्स्यति अपि तु महाकुम्भस्य भावं सुदूरवर्तिषु ग्रामेषु निवसतां जनानां मध्ये प्रापयिष्यति ये हि भौतिकरूपेण अस्य ऐतिहासिकमहोत्सवे भागं न ग्रहीतुं अशक्नुवन्।

तेन प्रतिपादितं यत् एषा वाहिनी महाकुम्भसम्बद्धाः सूचनाः विविधसमुदायान् प्रति प्रापयिष्यति। अत्रावसरे मुख्यमन्त्रिणा प्रोदीरितं यत् महाकुम्भः एषः ऐक्यभावनायाः सन्देशं प्रसारयति इति। श्रीयोगिना उक्तं यत् प्रसारभारत्या सुन्दररीत्या कुम्भवाणीमाध्यमेन महाकुम्भस्य भावः गृहीतः। अस्मिन्नवसरे कुम्भमङ्गलध्वनिरपि लोकार्पितः।

## दिल्लीविधानसभा

दिल्ली-विधानसभा-निर्वाचनाय अधिसूचना प्रसारिता। अनया अधिसूचनया सह सप्तति-सदस्यात्मकेभ्यः विधानसभासनेभ्यः नामाङ्कनप्रक्रिया समारब्धा। प्रत्याशिनः जनवरीमासस्य सप्तदश-दिनाङ्कं यावत् नामाङ्कनपत्राणि पूरयितुं शक्नुवन्ति। तत्रैव नामाङ्कनप्रत्यावर्तनस्य अन्तिमं दिनं जनवरी-मासस्य विंशतिदिनाङ्को वर्तते। अवधेयास्पदं वर्तते यत् मतदानं फरवरीमासे पञ्चमे दिनाङ्के अपरत्र मतगणना अष्टमे दिनाङ्के समुद्घोषितं वर्तते।

।।इति वार्ताः।।